# <u>अथर्ववेदः</u>

**Presented by**
Achyuta Adhikari
SACT-II
Department of Sanskrit
Saltora Netaji Centenary College
Saltora, Bankura, 722158.
E-mail:
**achyutaadhikary00538@gmail.com**

# अथर्ववेदः

अथर्ववेदः अभिचारक्रियायाः प्राधान्येन प्रतिपादकः अयं वेदः अथर्वनामकर्षिणा दृष्टः। वेदेष्वथर्ववेदः अयमेकया भूयस्या विशिष्टतया सह संवलितोऽस्ति। ऋग्वेदादित्रयो वेदाः आमुष्मिकफलदातारः सन्ति। यदा हि ऋग्वेदादयस्त्रयो वेदा आमुष्मिकं फलं प्रददति, तदाऽयं अथर्ववेद ऐहिकमपि फलं प्रयच्छति। जीवनं सुखसमन्वितं कर्तुं येषां साधनानामपेक्षा भवति, तेषां सिद्ध्यर्थमम् इह वेदे विविधानामनुष्ठानानां विधानं विहितमस्ति। पतञ्जलिना यद्यप्यस्य वेदस्य नवशाखाः समुल्लिखताः, परमीदानीन्तु पैप्पलाद-शौनकसंज्ञके द्वे एव शाखे लभ्येते। प्रचलिता अथर्वसंहिता शौनकशाखान्तर्गता पैप्पलादशाखासंहिताऽपि च अनतिचिरेणैव मुद्रिते स्तः।

# रचनाकालः

- अथर्ववेदस्य रचनाकालः ऋग्वेदापेक्षया अवान्तरकालिकः मन्यते। भाषायाः छन्दसश्च दृष्ट्या अथर्ववेदस्य अनुशीलनमस्य पूर्वोक्तसिद्धान्तस्य पोषकोऽस्ति । अथर्वस्य भाषा ऋग्वेदीयसंस्कृतापेक्षया कतिपयदृष्ट्या अनेकरूपेषु अर्वाचीना प्रतीता भवति। छन्दसामपीयमेव दशाऽस्ति । न तावदेतावदेव अपि तु भौगोलिकी सांस्कृतिकी च परिस्थितयोः अपीदमेव भावं व्यक्तं कुर्वन्ति यदथर्ववेदे चित्रितसमाजस्य प्रतिबिम्बमृग्वेदे चित्रितसमाजापेक्षया अवान्तरकालिकमस्ति ।

# शाखाः

- दित करें
- पस्पशाह्निके 'नवधाऽऽथर्वणो वेदः' इति लिखित्वा पतञ्जलिना अथर्ववेदस्य नवशाखाः कथिताः। पुराणानुसारेण वेदव्यासः यं शिष्यम् अथर्वस्य अध्यापनम् अकारयत्, तस्य नाम सुमन्तुः इति आसीत्।[३९] भागवतेऽस्य चर्चाऽस्ति – सुमन्तुः अभिचारप्रधानवेदस्य मुख्यप्रचारकः आसीत्। तेन असौ 'दारुणमुनिः' इत्युपाधिना विभूषितः आसीत्। अथर्ववेदस्य शाखानां विस्तारः पुराणेषु वर्णितः अस्ति। किञ्च भागवते कबन्धस्य नाम निर्दिष्टं नास्ति।[४०] अस्मिन् पुराणे सुमन्तोः द्वौ शिष्यौ कथितौ - पथ्यो वेददर्शश्चेति। विष्णुपुराणेऽपि शिष्यद्वयस्य चर्चाऽस्ति। किन्तु वेददर्शस्य स्थाने 'देवदर्श' इति नाम अस्ति

# अथर्वे विज्ञानम्

- अथर्ववेदाभ्यन्तरे आयुर्वेदीयसिद्धान्तस्य, व्यवहारस्य च अनेकेषां महनीयजिज्ञास्यविषयाणां विशिष्टसङ्कलनमस्ति। अस्यानुशीलनेन आयुर्वेदस्य प्राचीनताप्रामाणिकता-व्यापकतादीनां पूर्णपरिचयो भवति। रोगस्य, शारीरिकप्रतीकारस्य, औषधादीनां च विषये अनेकोपयोगीनां वैज्ञानिकतथ्यानां च उपलब्धिः अथर्ववेदस्य आयुर्वैदिकविशिष्टता प्रदर्शयितुं पर्याप्तः।[२१] तपनरोगस्य (ज्वरस्य) सामान्यवर्णनम् अस्मिन् वेदस्य मन्त्रे प्राप्यते।[२२] सतत-शारदग्रैष्म-शीत-वार्षिक-तृतीयकादिज्वर-प्रभेदानां निदर्शनम् अपि प्राप्यते।[२३] यक्ष्मा-विद्रध-वातीकारादिरोगाणां वर्णनं मन्त्रेषु प्राप्यते।[२४] प्रतीकारस्य विषये आधुनिकप्रणाल्याः शल्यचिकित्सायाः निर्देशः अतीव विस्मयकारी प्रतीतो भवति। यथा – मूत्रघाते शरशलाकादिना मूत्रस्य निःसारणम्[२५], सुखप्रसवाय योनिभेदनम्[२६], जलधावनेन व्रणस्योपचारः[२७] इत्यादयः।

# ऋग्वेदस्य पूरकत्वेन अथर्ववेदः

- ऋग्वेदः यदि अधिकांशतः आधिदैविकविषयस्याध्यात्मिकविषयस्य च मनोरममन्त्राणां सङ्ग्रहोऽस्ति, तर्हि अथर्ववेदः , आधिभौतिकविषयोपरि रचितमन्त्राणां रुचिरस्तथा प्रशंसनीयः सङ्ग्रहोऽस्ति। काव्यदृष्ट्या उभयोर्मध्ये उदात्तभावनया मण्डितस्तथा मानवहृदयस्पर्शिगीतिकाव्यानां बृहत्सङ्ग्रहोऽस्ति । उभयोर्मिलित्वा आर्याणां प्राचीनतमकाव्यकलायाः रुचिरदृष्टान्त समुपस्थाय विनात्र काचिद्विप्रतिपत्तिरिति ।

# भाष्यम्

- सायणात् पूर्ववर्त्ती अथर्वसंहितायाः न कोऽपि भाष्यकारोऽभवत्। सायणस्तु सम्पूर्णायाम् अथर्वसंहितायामुपरि भाष्यं लिलेख, किञ्च प्रकाशितग्रन्थेषु द्वादश काण्डानाम् ( १-४, ६-८, ११, १७-२०) एव भाष्यमुपलब्धं भवति। अनेन प्रकारेणास्य वेदस्य सायणभाष्यमप्यपूर्णमेवाऽस्ति

# धन्यवाद